# आत्मविषये *आत्मतत्त्वविवेक-न्यायकुसुमाञ्जलि*ग्रन्थयोः तुलनात्मकसमीक्षा

**विषयसूचकशब्दावल्यः**– आत्मतत्त्वम्, क्षणभङ्गवादः, जीवात्मा, परमात्मा, मोक्षश्च।

प्राचीनग्रन्थेषु दार्शनिकोत्कर्षताया उज्ज्वलस्वरूपौ ग्रन्थौ प्राचीननैयायिकोदयानाचार्यरचितौ *आत्मतत्त्वविवेकन्यायकुसुमाञ्जली* इति। *आत्मतत्त्वविवेको न्यायकुसुमाञ्जलि*-रित्युभयोर्ग्रन्थयोर्मूलोद्देश्यमात्मविषयकबाधकमतखण्डनेन साधकप्रमाणेनात्मप्रतिष्ठा।उभावपि ग्रन्थौ स्वतन्त्रग्रन्थविशेषौ वर्तेते। पृथग्रूपेण विद्यमानत्वाद् ग्रन्थयोर्मध्येऽवश्यमेव सादृश्यमिव वैसादृश्यमपि दरीदृश्यतेऽस्मिन्विषये सन्देहावकाशो नास्ति– इति विषयं शिरसि निधाय 'आत्मविषये *आत्मतत्त्वविवेक-न्यायकुसुमाञ्जलि*ग्रन्थयो: तुलनात्मकसमीक्षा' इत्यमुं विषयमधिकृत्य शोधकार्ये प्रयते। तत्राध्यायपञ्चके कथं विषयाणां प्रतिपादनं वर्तते तद्विषये सामान्येनात्र पर्यालोच्यते।

प्रथमेऽध्याये उदयनाचार्यस्य जीवनपरिचयं कृतित्वञ्च प्रत्यालोकपातः क्रियते। उदयनाचार्यस्य यथा जन्मस्थानविषये तथैवाविर्भावकालविषये यथेष्टं मतविविधता वर्तते चेदपि दशमशताब्द्यामुदयनाचार्य आविर्बभूवेति प्रमाणाधारेण प्रतिपादितम्।

द्वितीयेऽध्याये न्यायदर्शनानुसारेणात्मस्वरूपविचारः क्रियते। आत्मन्निति शब्देन जीवात्मनः परमात्मनो गृहीतत्वाद् उभयोरात्मनोर्विषये पर्यालोचनं विहितम्। तत्र च जीवात्मनस्स्वरूपपर्यालोचनेन जीवात्मनो वैशिष्ट्यमपि परिलक्ष्यते। यथा– जीवात्मा देहादिव्यतिरिक्तः, सगुणः, नित्यः, बहुः, निरवयवश्च। अपरपक्षे जगतः सृष्टावीश्वर उपादानकारणं न भवति चेदपि निमित्तकारणं भवति। जगतः सृष्टिस्थितिप्रलयानां नियन्ता परमात्मेश्वर एव। एवंरूपेण जीवात्मनः परमात्मनश्च द्वितीयेऽध्याये मोक्षोपयोगिता वर्णिता।

तृतीयेऽध्याये *आत्मतत्त्वविवेक*ग्रन्थस्यात्मविषयक-पर्यालोचनं क्रियते। तत्र बौद्धस्वीकृतस्य क्षणभङ्गवादस्य, बाह्यार्थभङ्गवादस्य, गुणगुणिभेदभङ्गवादस्य, अनुपलब्ध्यभावसाधकवादस्य च खण्डनेनात्मस्थापनं वर्तते।

चतुर्थेऽध्याये *न्यायकुसुमाञ्जलि*ग्रन्थस्यात्मविषयक-पर्यालोचनं क्रियते। *न्यायकुसुमाञ्जला*वीश्वरस्य मननात्मकोपासनार्थं पञ्चस्तवके पञ्च विप्रतिपत्तिवाक्यानि प्रदर्शितानि। एतत्सर्वं प्रतिपाद्य तस्य खण्डनं च कृत्वा पञ्चदर्शनानां यथा चार्वाकः, मीमांसकः, बौद्धः, जैनः, सांख्यदर्शनञ्चेत्येतेषां मतस्य क्रमेण खण्डनं कृत्वा परमात्मनः प्रतिपादनं वर्तते।

पञ्चमेऽध्याये आत्मविषये ग्रन्थद्वयस्य तुलनात्मकमालोचनं क्रियते। *आत्मतत्त्वविवेको न्यायकुसुमाञ्जलिश्चे*ति ग्रन्थद्वयस्य सादृश्यं विद्यते तथैव वैसादृश्यस्य सद्भावापि विद्यते।

**सादृश्यम्**–

उदयनाचार्यकृतेषु ग्रन्थेषु *आत्मतत्त्वविवेको न्यायकुसुमाञ्जलिश्चे*ति ग्रन्थद्वयं स्वतन्त्रग्रन्थरूपेण परिलक्ष्यते। अर्थाद् ग्रन्थद्वयं कामपि टीकां तथा भाष्यमवलम्ब्य नैव रचितम्।

दर्शनशास्त्रं प्रधानतो मोक्षशास्त्रमेव। धर्मार्थकाममोक्षेषु परमपुरुषार्थो मोक्ष एव सर्वेषां परमकाम्यः। आत्मतत्त्वविषयज्ञानमेव मोक्षस्य साक्षात्कारणस्वरूपम्। तस्य आत्मतत्त्वस्वरूपस्य प्रतिपादनमेव ग्रन्थद्वयस्यापि मुख्यविषयो वर्तते।

**वैसादृश्यम्–**

*आत्मतत्त्वविवेको न्यायकुसुमाञ्जलिश्चे*ति स्वतन्त्रग्रन्थद्वयस्यात्मतत्त्वप्रतिपादनमेव मुख्यविषयो वर्तते। *आत्मतत्त्वविवेक*ग्रन्थे जीवात्मविषयकमालोचनं वर्तते। पूर्वपक्षिरूपेण बौद्धान् स्वीकृत्य तेषां विविधमतानां खण्डनपुरःसरं न्यायसम्मतस्य शरीराद्यतिरिक्तनित्यविभुज्ञानवत्सुखादेराश्रयरूपेण जीवात्मनः प्रतिपादनं कृतम्।

परन्तु *न्यायकुसुमाञ्जलि*ग्रन्थे परमात्मविषयकमालोचनमर्थाद् ईश्वरविषयकमालोचनं विद्यते। ईश्वरस्य मननात्मकोपासना ग्रन्थस्यास्य मुख्यविषयः।

एवंरूपेणाध्यायपञ्चकेन प्रबन्धस्योद्देश्यपरिपूरणायात्मविषये दृष्टिप्रदानेन मोक्षप्राप्ति-मार्गः प्रशस्यते। भारतीदर्शनपरम्परायां स्वीकृतेषु पुरुषार्थेषु परमपुरुषार्थो भवति मोक्षः। मोक्षप्राप्तिमार्गे दर्शनं महत्त्वपूर्णां भूमिकामावहति। अत्र प्रश्न उत्पद्यते यत्, मोक्षः कथं सम्भवति दर्शनेनेति? उत्तरे कथयितुं शक्यते यत्, दर्शनादात्मसाक्षात्कारो जायते आत्मसाक्षात्काराच्च मोक्षः प्राप्यते। आत्मन्निति शब्देन यथा जीवात्मा संसूच्यते तथैव परमात्मापि ज्ञापितो भवति। जीवात्मनः तथा परमात्मन आलोचनं बहुत्र स्वल्पाधिक्येन दृश्यते चेदप्युदयनाचार्येणा*त्मतत्त्वविवेके* तथा *न्यायकुसुमाञ्जलौ* पूर्वपक्षिमतखण्डनपूर्वकं न्यायसम्मतात्मतत्त्वं व्यवस्थाप्य न्याय-वैशेषिकप्रस्थाने विजय-वैजयन्ती पौनःपुन्येन प्रतिस्थापिता। न केवलं पूर्वपक्षिणां खण्डनमेव, अपि तूपनिषदादिप्रमाणेनापि *न्यायकुसुमाञ्जलि*ग्रन्थे ईश्वरमननात्मकोपासनारूपदुरूहकार्यं सम्पादितम्।

अत उभयोर्ग्रन्थयोरात्मबाधकप्रमाणखण्डनस्यात्मसाधकप्रमाणस्य चाधिक्येन दृश्यमानत्वादस्मिन् शोधकार्येऽप्यात्मबाधकानामात्मसाधकानाञ्च विषये आधिक्येनालोचनं विहितम्। वस्तुतोऽत्र 'आत्मविषये *आत्मतत्त्वविवेक-न्यायकुसुमाञ्जलि*ग्रन्थयोः

तुलनात्मकसमीक्षा’ इति शीर्षकस्थितस्य ‘आत्मविषये’ इत्यस्याशयो न केवलमात्मस्वरूपप्रतिपादनम्, अत्रात्मप्रसङ्गे आगतानां बाधकानां तथा साधकानामपि विषयोऽपि समागच्छति। एवञ्च ग्रन्थद्वयस्यात्मविषयकतुलनात्मकसमीक्षणेनात्मविषयका-नुभवो सुदृढतया परिस्फुट्यते, येन मोक्षप्राप्तेरुपायो वर्धते। एतत् सर्वं शोधनिबन्धस्य मुख्योद्देश्यरूपेण प्रतिभातम्। अपि चात्मविषयकगूढतत्त्वेन सुसमृद्धस्य *आत्मतत्त्वविवेको न्यायकुसुमाञ्जलिश्चे*ति ग्रन्थद्वयस्य भाषाविषययोरत्यन्तं काठिन्यादध्येतॄणां बोधोऽतीव दुष्करो भवति। अतो गवेषणकार्यमाध्यमेन ग्रन्थद्वयस्यात्मविषयकतुलनात्मकसमीक्षणेनाध्ये-तॄणां समीपे सरलरूपेण ग्रन्थविषयस्योपस्थापनमपि मम लक्ष्यमिति।

**देवश्री-खाँडा**